जगच्चित्रम्

(जगच्चित्रनिबन्ध...)

नं० १ जगन्मणिकवचम्

ॐ श्रीगणेशाय नमः अथ जगच्चिंतामणिनामकवचम्
श्रीभैरव उवाच शृणु त्रिपुरसुंदर्या रहस्यं कामनावहं जग
च्चिंतामणिनामकवचं मंत्रविग्रहं यं धृत्वा भगवाल्लि
प्सं दैत्यदानवान्महः तपोभिर्दुर्जितान्स्त्रीणां संहरेत्प्र
भुतो (?) यः सृष्टिं करोति भगवान्ब्रह्मा यस्य प्रसादतः स
र्वौ यस्य प्रसादेन लक्ष्वधी विष्णुः सदा हरं येन जघानैं द्रोग
मो व्याहतविक्रमः येनाग्निरपि दुर्धर्षो सजेत् यो पर्मराडुत्ता
मः नैर्ऋतिर्वरुणो वायुः कुबेरो ईश्वरादयः पंदं ... सोपा
सनतः संहरन्ति रणे रिपून् यस्योपदेशतः स्कंदः सेनानी

जं. क. १

त्रिदिवौकसां व्यासाद्याऋषयो येन भारताद्यान्प्रचक्रिरे
विवस्वानपितेजस्वीसर्वज्ञोभगवान्भवः कालयमपित्रि
लंकालीयस्यवीर्येणपार्वती जगत्चिंतामणेरस्यऋषि
र्देवःसदाशिवः छंदःपंक्तिर्देवतास्यान्महात्रिपुरसुंदरी
वाग्भवंबीजमाख्यातंशक्तिःश्रीकामराजकं शक्तिश्चकी
लकंदेव्याःसर्वैश्वर्यैकसाधनं धर्मार्थकाममोक्षार्थे वि
नियोगःप्रकीर्तितः ॐ अस्यश्रीमहात्रिपुरसुंदरीजगच्चिं
तामणिर्नामकवचस्य सदाशिवऋषिः पंक्तिछंदः श्री
महात्रिपुरसुंदरीदेवता ऐंबीजं ह्रीं शक्तिः सौंकीलकं

धर्मार्थकाममोक्षार्थे विनियोगः ॐ श्रीं ऐं सौः ह्सौः
ॐ ह्रीं शिरः पायात्सरस्वती ऐं सौः पायाल्ललाटं मे महा
त्रैलोक्यमंगला ऐं क्लीं फ्रें फट् फ्रें वा पातु सर्वसौभाग्य
मंगला ॐ ह्रूं ह्रीं श्रीं श्रुती पातु समस्तमदनातुरा ॐ फ
ट् स्वाहा ह्वावता नेत्रे महात्रिपुरभैरवी ॐ ह्रूं क्रौं पातु मे ना
सां महात्रिभुवनेश्वरी ॐ ॐ ह्रूं ह्रूं ह्सौः ऐं सौः पायाद् ह्रूं ॐ
मुखेश्वरी ॐ श्रीं क्लीं क्लीं ह्सौः पातु सर्वत्रिपुरभैरवी ॐ ॐ
ऐं ऐं ह्लूं पायाद्दोष्टौ त्रिपुरमालिनी ॐ श्रीं श्रीं श्रीं रसनया
त्वं महात्रैलोक्यसुंदरी ॐ ऐं सौः पातु मे कंठं महात्रैलोक्य

त्रि॰
क॰
२

मोहिनी ॐ श्रीं ह्रीं ऐं ह्लौंः पातु स्कंधौ त्रिपुरमालिनी ॐ
श्रीं ह्रीं सौः भुजौ पातु महात्रिपुरभैरवी ॐ क्लीं श्रीं ह्रीं क
रौ पातु हं हं भुवनमोहिना ॐ ह्रूं फट् पातु वक्षः महा
त्रिपुरनार्चिता ॐ ऐं ह्लौंः ह्लें पातु देवी पार्श्वौ भुवनका
2
मिनी ॐ ह्रूं ह्रूं ह्लें ऊर्ति पातु महात्रिपुरकर्षिणी ॐ श्रीं
ह्रीं क्लीं ह्सौः मे पातु नाभिं त्रैलोक्यमोहिना ॐ श्रीं ऐं ह्रीं क
टिं पातु महासुंदरसुंदरी ॐ श्रीं ह्रीं सौः ह्रूं पातु शिश्नं त्रै
लोक्यमोहिनी ॐ श्रीं ग्लः ह्रः शू पातु ऊर्ध्वं त्रैलोक्यसूदिनी
ॐ श्रीं श्रीं ह्रैं फट् पायाज्जानू त्रैलोक्यकारिणी ॐ ह्रूं फट् ठः

ह्सौंः पातु जंघे त्रैलोक्यमोहिनी ऐं ह्रीं श्रीं सौंः स्फ्रें ह्सौंः पातु गु
ल्फौ त्रैलोक्यगोपिता ॐ ह्रीं श्रीं ऐं ह्स्फ्रें ठः फट् पातु पादौ त्रैलोक्य
देवता ॐ श्रीं ह्रीं क्लीं ह्सौंः पातु वपुस्त्रैलोक्यशंकरी ह्रीं ऐं सौंः
ह्रीं क्लीं ह्सौंः पातु वपुस्त्रैलोक्यशंकरी ॐ ऐं सौंः ह्रीं श्रीं ह्सौंः ऐं
क्लीं ह्रीं ह्स्फ्रें क्लीं ह्रीं गूं ह्स्रूं शिरः शिरसः पादपर्यंतं वपुर्मे त्रिपुरे
श्वरी ॐ ॐ श्रीं ह्रीं ह्सौंः हूं फट् ठः ठः ठः ठः ह्स्रूं ह्स्रूं मूर्धादिपाद
पर्यंतं वपुस्त्रिपुरसुंदरी एवं मां भैरवी पातु बाला मां पातु द
क्षिणे मालिनी पश्चिमे पातु वशिनी चोत्तरे च तु ऊर्ध्वं पातु म
हादेवी महात्रिपुरसुंदरी अधस्तान्मां देवेशी पाताले तल

ज॰ वासिनी आग्नेये वाग्भवापान्तु नैऋत्ये कामराजकः वाय
क॰ व्ये शक्तिरव्यात्मा मोघानैशाने प्रणवो वत्तु प्रभाते पान्तु मंल
१ क्ष्मीर्मध्याह्ने पातु मायरा सायं माया फट्बीजं निशायां वह्नि
३ वल्लभा अर्द्धरात्रे च विच्छराव्यान्निशान्ते षोडशाक्षरी रणे राजर
घू॰ हे [illegible] तेन रणो हरिं स्रमद्रि निगडे वं यकारायां विवादे दुर्गे
भूमिषु जले वह्नौ समीरे वगजारि हरि भातिषु वोरेषु य
त्रभूतेष्वपत्सु यक्षव्याभोगिषु ग्रहेषु ग्रहपीडा सरोगेषु स
र्वमोहिषु श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं प्रीं श्रीं सौः ऐं क्लीं ह्रीं श्रीं
पान्तु महात्रिपुरसुन्दरी इतीदं कवचं दिव्यं देवानामपि दुर्लभं

महात्रिपुरसुंदर्याः सर्वसंकामनावहं जगच्चिंतामणिनाम कवचं मंत्रविग्रहं नवश्रीव्यामयाख्यातं गोपनीयं प्रयत्नतः इदं रहस्यं परमं गुह्याद्गुह्यतरं परं धन्यं यशस्यमायुष्यं भोगमोक्षैकसाधनं दुःस्वप्ननाशनं पुंसां नरनारीवशंकरं इदं कवचराजं देवी भूर्जे तालपत्रे लिखेत् रजस्वलायाः रक्तेन ॐ ऊं मे मिश्र चंदनैः भूर्जे त्वचि जपेन्मंत्रं अष्टोत्तरशतावधि वेष्टयेन्नील सूत्रेण स्थापयेत्सीसकेन च वेष्टयेत्त्वर्णसूत्रेणाभिधारयेच्छिर सा विके योषित्कामुको वस्त्रादर्शरूपादर्शने तु भजे संभवे यदपि ब्रह्माणमानयेद्वशंकरं मारयेत्सहसा मृत्युं वशायेद्भुवनत्रय

जं०
क०
४

आकर्षयेद्देवनारीः स्तंभयेदग्निमेव हि अ उच्चाटयेज्जगन्नाथ
पाठादस्य न संशयः वंध्यानां पुत्रदं ह्येतद्रोगिणां रोगहारकं
भोगिनां भोगदं सत्यं योगिनां योगवर्द्धनं लक्ष्मीसंवर्द्धनं
सद्यः दारिद्र्याद्येकतस्करं सर्वस्वमेतद्रहस्यमेकरसोचिंता
मणिः परः इदं चिंतामणिनामकवचं भुवि दुर्लभं श्रद्धा
कार्यमदातव्यमवक्तव्यं वरानने गोप्यं गुह्यं सदा गोप्यं
मित्याज्ञा परमेश्वरी इति श्रीरुद्रयामले तंत्रे ईश्वरपार्वती
संवादे जगच्चिंतामणिनामकवचं समाप्तं शुभमस्तु